# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

### अध्याय ८

हन्यमाने बले तस्मिन्पद्मनाभेन पृष्ठतः ।
माल्यवान्संनिवृत्तोऽथ वेलातिग इवार्णवः ॥ १॥

संरक्तनयनः कोपाच्चलन्मौलिर्निशाचरः ।
पद्मनाभमिदं प्राह वचनं परुषं तदा ॥ २॥

नारायण न जानीषे क्षत्रधर्मं सनातनम् ।
अयुद्धमनसो भग्नान्योऽस्मान्हंसि यथेतरः ॥ ३॥

पराङ्मुखवधं पापं यः करोति सुरेश्वर ।
स हन्ता न गतः स्वर्गं लभते पुण्यकर्मणाम् ॥ ४॥

युद्धश्रद्धाथ वा तेऽस्ति शङ्खचक्रगदाधर ।
अहं स्थितोऽस्मि पश्यामि बलं दर्शय यत्तव ॥ ५॥

उवाच राक्षसेन्द्रं तं देवराजानुजो बली ।
युष्मत्तो भयभीतानां देवानां वै मयाभयम् ।
राक्षसोत्सादनं दत्तं तदेतदनुपाल्यते ॥ ६॥

प्राणैरपि प्रियं कार्यं देवानां हि सदा मया ।
सोऽहं वो निहनिष्यामि रसातलगतानपि ॥ ७॥

देवमेवं ब्रुवाणं तु रक्ताम्बुरुहलोचनम् ।
शक्त्या बिभेद सङ्क्रुद्धो राक्षसेन्द्रो ररास च ॥ ८॥

माल्यवद्भुजनिर्मुक्ता शक्तिर्घण्टाकृतस्वना ।
हरेरुरसि बभ्राज मेघस्थेव शतह्रदा ॥ ९॥

ततस्तामेव चोत्कृष्य शक्तिं शक्तिधरप्रियः ।
माल्यवन्तं समुद्दिश्य चिक्षेपाम्बुरुहेक्षणः ॥ १०॥

स्कन्दोत्सृष्टेव सा शक्तिर्गोविन्दकरनिःसृता ।
काङ्क्षन्ती राक्षसं प्रायान्महोल्केवाञ्जनाचलम् ॥ ११॥

सा तस्योरसि विस्तीर्णे हारभासावभासिते ।
अपतद्राक्षसेन्द्रस्य गिरिकूट इवाशनिः ॥ १२॥

तया भिन्नतनुत्राणाः प्राविशद्विपुलं तमः ।
माल्यवान्पुनराश्वस्तस्तस्थौ गिरिरिवाचलः ॥ १३॥

ततः कार्ष्णायसं शूलं कण्टकैर्बहुभिश् चितम् ।
प्रगृह्याभ्यहनद्देवं स्तनयोरन्तरे दृढम् ॥ १४॥

तथैव रणरक्तस्तु मुष्टिना वासवानुजम् ।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः ॥ १५॥

ततोऽम्बरे महाञ्शब्दः साधु साध्विति चोत्थितः ।
आहत्य राक्षसो विष्णुं गरुडं चाप्यताडयत् ॥ १६॥

वैनतेयस्ततः क्रुद्धः पक्षवातेन राक्षसं ।
व्यपोहद्बलवान्वायुः शुष्कपर्णचयं यथा ॥ १७॥

द्विजेन्द्रपक्षवातेन द्रावितं दृश्य पूर्वजम् ।
सुमाली स्वबलैः सार्धं तङ्काम् अभिमुखो ययौ ॥ १८॥

पक्षवातबलोद्धूतो माल्यवानपि राक्षसः ।
स्वबलेन समागम्य ययौ लङ्कां ह्रिया वृतः ॥ १९॥

एवं ते राक्षसा राम हरिणा कमलेक्षणा ।
बहुशः संयुगे भग्ना हतप्रवरनायकाः ॥ २०॥

अशक्नुवन्तस्ते विष्णुं प्रतियोद्धुं भयार्दिताः ।
त्यक्त्वा लङ्कां गता वस्तुं पातालं सहपत्नयः ॥ २१॥

सुमालिनं समासाद्य राक्षसं रघुनन्दन ।
स्थिताः प्रख्यातवीर्यास्ते वंशे सालकटङ्कटे ॥ २२॥

ये त्वया निहतास्ते वै पौलस्त्या नाम राक्षसाः ।
सुमाली माल्यवान्माली ये च तेषां पुरःसराः ।
सर्व एते महाभाग रावणाद्बलवत्तराः ॥ २३॥

न चान्यो रक्षसां हन्ता सुरेष्वपि पुरञ्जय ।
ऋते नारायणं देवं शङ्खचक्रगदाधरम् ॥ २४॥

भवान्नारायणो देवश्चतुर्बाहुः सनातनः ।
राक्षसान्हन्तुमुत्पन्नो अजेयः प्रभुरव्ययः ॥ २५॥

।

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com